॥ वाल्मीकि रामायण॥

३ अरण्यकाण्ड

अध्याय १०

अग्रतः प्रययौ रामः सीता मध्ये सुमध्यमा ।
पृष्ठतस्तु धनुष्पाणिर्लक्ष्मणोऽनुजगाम ह ॥१॥

तौ पश्यमानौ विविधाञ्शैलप्रस्थान्वनानि च ।
नदीश्च विविधा रम्या जग्मतुः सह सीतया ॥२॥

सारसांश्चक्रवाकांश्च नदीपुलिनचारिणः ।
सरांसि च सपद्मानि युतानि जलजैः खगैः ॥३॥

यूथबद्धांश्च पृषतान्मदोन्मत्तान्विषाणिनः ।
महिषांश्च वराहांश्च गजांश्च द्रुमवैरिणः ॥४॥

ते गत्वा दूरमध्वानं लम्बमाने दिवाकरे ।
ददृशुः सहिता रम्यं तटाकं योजनायतम् ॥५॥

पद्मपुष्करसम्बाधं गजयूथैरलङ्कृतम् ।
सारसैर्हंसकादम्बैः सङ्कुलं जलचारिभिः ॥६॥

प्रसन्नसलिले रम्यतस्मिन्सरसि शुश्रुवे ।
गीतवादित्रनिर्घोषो न तु कश्चन दृश्यते ॥७॥

ततः कौतूहलाद्रामो लक्ष्मणश्च महारथः ।
मुनिं धर्मभृतं नाम प्रष्टुं समुपचक्रमे ॥८॥

इदमत्यद्भुतं श्रुत्वा सर्वेषां नो महामुने ।
कौतूहलं महज्जातं किमिदं साधु कथ्यताम् ॥९॥

तेनैवमुक्तो धर्मात्मा राघवेण मुनिस्तदा ।
प्रभावं सरसः कृत्स्नमाख्यातुमुपचक्रमे ॥१०॥

इदं पद्माप्सरो नाम तटाकं सार्वकालिकम् ।
निर्मितं तपसा राम मुनिना माण्डकर्णिना ॥११॥

स हि तेपे तपस्तीव्रं माण्डकर्णिर्महामुनिः ।
दशवर्षसहस्राणि वायुभक्षो जलाश्रय ॥१२॥

ततः प्रव्यथिताः सर्वे देवाः साग्निपुरोगमाः ।
अब्रुवन्वचनं सर्वे परस्पर समागताः ।
अस्मकं कस्य चित्स्थानमेष प्रार्थयते मुनिः ॥१३॥

ततः कर्तुं तपोविघ्नं सर्वैर्दैवैर्नियोजिताः ।
प्रधानाप्सरसः पञ्चविद्युच्चलितवर्चसः ॥१४॥

अप्सरोभिस्ततस्ताभिर्मुनिर्दृष्टपरावरः ।
नीतो मदनवश्यत्वं सुराणां कार्यसिद्धये ॥१५॥

ताश्चैवाप्सरसः पञ्चमुनेः पत्नीत्वमागताः ।
तटाके निर्मितं तासामस्मिन्नन्तर्हितं गृहम् ॥१६॥

तत्रैवाप्सरसः पञ्चनिवसन्त्यो यथासुखम् ।
रमयन्ति तपोयोगान्मुनिं यौवनमास्थितम् ॥१७॥

तासां सङ्क्रीडमानानामेष वादित्रनिःस्वनः ।
श्रूयते भूषणोन्मिश्रो गीतशब्दो मनोहरः ॥१८॥

आश्चर्यमिति तस्यैतद्वचनं भावितात्मनः ।
राघवः प्रतिजग्राह सह भ्रात्रा महायशाः ॥१९॥

एवं कथयमानस्य ददर्शाश्रममण्डलम् ।
कुशचीरपरिक्षिप्तं नानावृक्षसमावृतम् ॥२०॥

प्रविश्य सह वैदेह्या लक्ष्मणेन च राघवः ।
तदा तस्मिन्स काकुत्स्थः श्रीमत्याश्रममण्डले ॥२१॥

उषित्वा सुसुखं तत्र पूज्यमानो महर्षिभिः ।
जगाम चाश्रमांस्तेषां पर्यायेण तपस्विनाम् ॥२२॥

येषामुषितवान्पूर्वं सकाशे स महास्त्रवित् ।
क्व चित्परिदशान्मासानेकं संवत्सरं क्व चित् ॥२३॥

क्व चिच्च चतुरो मासान्पञ्चषट्चापरान्क्व चित् ।
अपरत्राधिकान्मासानध्यर्धमधिकं क्व चित् ॥२४॥

त्रीन्मासानष्टमासांश्च राघवो न्यवसत्सुखम् ।
तथा संवसतस्तस्य मुनीनामाश्रमेषु वै ।
रमतश्चानुकुल्येन ययुः संवत्सरा दश ॥२५॥

परिसृत्य च धर्मज्ञो राघवः सह सीतया ।
सुतीक्ष्णस्याश्रमं श्रीमान्पुनरेवाजगाम ह ॥ २६ ॥

स तमाश्रममागम्य मुनिभिः प्रतिपूजितः ।
तत्रापि न्यवसद्रामः कं चित्कालमरिन्दमः ॥ २७ ॥

अथाश्रमस्थो विनयात्कदा चित्तं महामुनिम् ।
उपासीनः स काकुत्स्थः सुतीक्ष्णमिदमब्रवीत् ॥ २८ ॥

अस्मिन्नरण्ये भगवन्नगस्त्यो मुनिसत्तमः ।
वसतीति मया नित्यं कथाः कथयतां श्रुतम् ॥ २९ ॥

न तु जानामि तं देशं वनस्यास्य महत्तया ।
कुत्राश्रमपदं पुण्यं महर्षेस्तस्य धीमतः ॥ ३० ॥

प्रसादात्तत्र भवतः सानुजः सह सीतया ।
अगस्त्यमभिगच्छेयमभिवादयितुं मुनिम् ॥ ३१ ॥

मनोरथो महानेष हृदि सम्परिवर्तते ।
यदहं तं मुनिवरं शुश्रूषेयमपि स्वयम् ॥ ३२ ॥

इति रामस्य स मुनिः श्रुत्वा धर्मात्मनो वचः ।
सुतीक्ष्णः प्रत्युवाचेदं प्रीतो दशरथात्मजम् ॥ ३३ ॥

अहमप्येतदेव त्वां वक्तुकामः सलक्ष्मणम् ।
अगस्त्यमभिगच्छेति सीतया सह राघव ॥ ३४ ॥

दिष्ट्या त्विदानीमर्थेऽस्मिन्स्वयमेव ब्रवीषि माम् ।
अहमाख्यासि ते वत्स यत्रागस्त्यो महामुनिः ॥ ३५ ॥

योजनान्याश्रमात्तात याहि चत्वारि वै ततः ।
दक्षिणेन महाञ्श्रीमानगस्त्यभ्रातुराश्रमः ॥ ३६ ॥

स्थलप्राये वनोद्देशे पिप्पलीवनशोभिते ।
बहुपुष्पफले रम्ये नानाशकुनिनादिते ॥ ३७ ॥

पद्मिन्यो विविधास्तत्र प्रसन्नसलिलाः शिवाः ।
हंसकारण्डवाकीर्णाश्चक्रवाकोपशोभिताः ॥ ३८ ॥

तत्रैकां रजनीमुष्य प्रभाते राम गम्यताम् ।
दक्षिणां दिशमास्थाय वनखण्डस्य पार्श्वतः ॥ ३९ ॥

तत्रागस्त्याश्रमपदं गत्वा योजनमन्तरम् ।
रमणीये वनोद्देशे बहुपादप संवृते ।
रंस्यते तत्र वैदेही लक्ष्मणश्च त्वया सह ॥ ४० ॥

स हि रम्यो वनोद्देशो बहुपादपसङ्कुलः ।
यदि बुद्धिः कृता द्रष्टुमगस्त्यं तं महामुनिम् ।
अद्यैव गमने बुद्धिं रोचयस्व महायशः ॥ ४१ ॥

इति रामो मुनेः श्रुत्वा सह भ्रात्राभिवाद्य च ।
प्रतस्थेऽगस्त्यमुद्दिश्य सानुजः सह सीतया ॥ ४२ ॥

पश्यन्वनानि चित्राणि पर्वपांश्चाभ्रसंनिभान् ।
सरांसि सरितश्चैव पथि मार्गवशानुगाः ॥ ४३ ॥

सुतीक्ष्णेनोपदिष्टेन गत्वा तेन पथा सुखम् ।
इदं परमसंहृष्टो वाक्यं लक्ष्मणमब्रवीत् ॥ ४४ ॥

एतदेवाश्रमपदं नूनं तस्य महात्मनः ।
अगस्त्यस्य मुनेर्भ्रातुर्दृश्यते पुण्यकर्मणः ॥ ४५ ॥

यथा हीमे वनस्यास्य ज्ञाताः पथि सहस्रशः ।
संनताः फलभरेण पुष्पभारेण च द्रुमाः ॥ ४६ ॥

पिप्पलीनां च पक्वानां वनादस्मादुपागतः ।
गन्धोऽयं पवनोत्क्षिप्तः सहसा कटुकोदयः ॥ ४७ ॥

तत्र तत्र च दृश्यन्ते सङ्क्षिप्ताः काष्ठसञ्चयाः ।
लूनाश्च पथि दृश्यन्ते दर्भा वैदूर्यवर्चसः ॥ ४८ ॥

एतच्च वनमध्यस्थं कृष्णाभ्रशिखरोपमम् ।
पावकस्याश्रमस्थस्य धूमाग्रं सम्प्रदृश्यते ॥ ४९ ॥

विविक्तेषु च तीर्थेषु कृतस्नाना द्विजातयः ।
पुष्पोपहारं कुर्वन्ति कुसुमैः स्वयमार्जितैः ॥ ५० ॥

तत्सुतीक्ष्णस्य वचनं यथा सौम्य मया श्रुतम् ।
अगस्त्यस्याश्रमो भ्रातुर्नूनमेष भविष्यति ॥ ५१ ॥

निगृह्य तरसा मृत्युं लोकानां हितकाम्यया ।
यस्य भ्रात्रा कृतेयं दिक्षरण्या पुण्यकर्मणा ॥ ५२ ॥

इहैकदा किल क्रूरो वातापिरपि चेल्वलः ।
भ्रातरौ सहितावास्तां ब्राह्मणघ्नौ महासुरौ ॥ ५३ ॥

धारयन्ब्राह्मणं रूपमिल्वलः संस्कृतं वदन् ।
आमन्त्रयति विप्रान्स श्राद्धमुद्दिश्य निर्घृणः ॥ ५४ ॥

भ्रातरं संस्कृतं भ्राता ततस्तं मेषरूपिणम् ।
तान्द्विजान्भोजयामास श्राद्धदृष्टेन कर्मणा ॥ ५५ ॥

ततो भुक्तवतां तेषां विप्राणामिल्वलोऽब्रवीत् ।
वातापे निष्क्रमस्वेति स्वरेण महता वदन् ॥ ५६ ॥

ततो भ्रातुर्वचः श्रुत्वा वातापिर्मेषवन्नदन् ।
भित्त्वा भित्वा शरीराणि ब्राह्मणानां विनिष्पतत् ॥ ५७ ॥

ब्राह्मणानां सहस्राणि तैरेवं कामरूपिभिः ।
विनाशितानि संहत्य नित्यशः पिशिताशनैः ॥ ५८ ॥

अगस्त्येन तदा देवैः प्रार्थितेन महर्षिणा ।
अनुभूय किल श्राद्धे भक्षितः स महासुरः ॥ ५९ ॥

ततः सम्पन्नमित्युक्त्वा दत्त्वा हस्तावसेचनम् ।
भ्रातरं निष्क्रमस्वेति इल्वलः सोऽभ्यभाषत ॥ ६० ॥

तं तथा भाषमाणं तु भ्रातरं विप्रघातिनम् ।
अब्रवीत्प्रहसन्धीमानगस्त्यो मुनिसत्तमः ॥ ६१ ॥

कुतो निष्क्रमितुं शक्तिर्मया जीर्णस्य रक्षसः ।
भ्रातुस्ते मेष रूपस्य गतस्य यमसादनम् ॥ ६२ ॥

अथ तस्य वचः श्रुत्वा भ्रातुर्निधनसंश्रितम् ।
प्रधर्षयितुमारेभे मुनिं क्रोधान्निशाचरः ॥ ६३ ॥

सोऽभ्यद्रवदिद्वजेन्द्रं तं मुनिना दीप्ततेजसा ।
चक्षुषानलकल्पेन निर्दग्धो निधनं गतः ॥ ६४ ॥

तस्यायमाश्रमो भ्रातुस्तटाकवनशोभितः ।
विप्रानुकम्पया येन कर्मेदं दुष्करं कृतम् ॥ ६५ ॥

एवं कथयमानस्य तस्य सौमित्रिणा सह ।
रामस्यास्तं गतः सूर्यः सन्ध्याकालोऽभ्यवर्तत ॥ ६६ ॥

उपास्य पश्चिमां सन्ध्यां सह भ्रात्रा यथाविधि ।
प्रविवेशाश्रमपदं तमृषिं चाभ्यवादयन् ॥ ६७ ॥

सम्यक्प्रतिगृहीतस्तु मुनिना तेन राघवः ।
न्यवसत्तां निशामेकां प्राश्य मूलफलानि च ॥ ६८ ॥

तस्यां रात्र्यां व्यतीतायां विमले सूर्यमण्डले ।
भ्रातरं तमगस्त्यस्य आमन्त्रयत राघवः ॥ ६९ ॥

अभिवादये त्वा भगवन्सुखमध्युषितो निशाम् ।
आमन्त्रये त्वां गच्छामि गुरुं ते द्रष्टुमग्रजम् ॥ ७० ॥

गम्यतामिति तेनोक्तो जगाम रघुनन्दनः ।
यथोद्दिष्टेन मार्गेण वनं तच्चावलोकयन् ॥ ७१ ॥

नीवारान्पनसांस्तालांस्तिमिशान्वञ्जुलान्धवान् ।
चिरिबिल्वान्मधूकांश्च बिल्वानपि च तिन्दुकान् ॥ ७२ ॥

पुष्पितान्पुष्पिताग्राभिर्लताभिरनुवेष्टितान् ।
ददर्श रामः शतशस्तत्र कान्तारपादपान् ॥ ७३ ॥

हस्तिहस्तैर्विमृदितान्वानरैरुपशोभितान् ।
मत्तैः शकुनिसङ्घैश्च शतशः प्रतिनादितान् ॥ ७४ ॥

ततोऽब्रवीत्समीपस्थं रामो राजीवलोचनः ।
पृष्ठतोऽनुगतं वीरं लक्ष्मणं लक्ष्मिवर्धनम् ॥ ७५ ॥

स्निग्धपत्रा यथा वृक्षा यथा क्षान्ता मृगद्विजाः ।
आश्रमो नातिदूरस्थो महर्षेर्भावितात्मनः ॥ ७६ ॥

अगस्त्य इति विख्यातो लोके स्वेनैव कर्मणा ।
आश्रमो दृश्यते तस्य परिश्रान्त श्रमापहः ॥ ७७ ॥

प्राज्यधूमाकुलवनश्चीरमालापरिष्कृतः ।
प्रशान्तमृगयूथश्च नानाशकुनिनादितः ॥ ७८ ॥

निगृह्य तरसा मृत्युं लोकानां हितकाम्यया ।
दक्षिणा दिक्कृता येन शरण्या पुण्यकर्मणा ॥ ७९ ॥

तस्येदमाश्रमपदं प्रभावाद्यस्य राक्षसैः ।
दिगियं दक्षिणा त्रासाद्दृश्यते नोपभुज्यते ॥ ८० ॥

यदा प्रभृति चाक्रान्ता दिगियं पुण्यकर्मणा ।
तदा प्रभृति निर्वैराः प्रशान्ता रजनीचराः ॥ ८१ ॥

नाम्ना चेयं भगवतो दक्षिणा दिक्प्रदक्षिणा ।
प्रथिता त्रिषु लोकेषु दुर्धर्षा क्रूरकर्मभिः ॥ ८२ ॥

मार्गं निरोद्धुं सततं भास्करस्याचलोत्तमः ।
सन्देशं पालयंस्तस्य विन्ध्यशैलो न वर्धते ॥ ८३ ॥

अयं दीर्घायुषस्तस्य लोके विश्रुतकर्मणः ।
अगस्त्यस्याश्रमः श्रीमान्विनीतमृगसेवितः ॥ ८४ ॥

एष लोकार्चितः साधुर्हिते नित्यं रतः सताम् ।
अस्मानधिगतानेष श्रेयसा योजयिष्यति ॥ ८५ ॥

आराधयिष्याम्यत्राहमगस्त्यं तं महामुनिम् ।

शेषं च वनवासस्य सौम्य वत्स्याम्यहं प्रभो ॥ ८६ ॥

अत्र देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
अगस्त्यं नियताहारं सततं पर्युपासते ॥ ८७ ॥

नात्र जीवेन्मृषावादी क्रूरो वा यदि वा शठः ।
नृशंसः काम वृत्तो वा मुनिरेष तथाविधः ॥ ८८ ॥

अत्र देवाश्च यक्षाश्च नागाश्च पतगैः सह ।
वसन्ति नियताहारो धर्ममाराधयिष्णवः ॥ ८९ ॥

अत्र सिद्धा महात्मानो विमानैः सूर्यसंनिभैः ।
त्यक्त्वा देहान्नवैर्देहैः स्वर्याताः परमर्षयः ॥ ९० ॥

यक्षत्वममरत्वं च राज्यानि विविधानि च ।
अत्र देवाः प्रयच्छन्ति भूतैराराधिताः शुभैः ॥ ९१ ॥

आगताः स्माश्रमपदं सौमित्रे प्रविशाग्रतः ।
निवेदयेह मां प्राप्तमृषये सह सीतया ॥ ९२ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com